# Gayatri Mantra

# સાર્થ ગાયત્રી મન્ત્રાર્થઃ

## Document Information

Text title : sArtha gAyatrI mantra

File name : sArthagAyatrI.itx

Category : deities_misc, stotra, vidyAraNya

Location : doc_deities_misc

Author : Sw. Vidyaranya (circa 13 cent. A.D.)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Advaita meaning of Gayatri mantra

Latest update : May 4, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સાર્થ ગાયત્રી મન્ત્રાર્થઃ

અથ સર્વદેવાત્મનઃ સર્વશક્તેઃ સર્વાવભાસકતેજોમયસ્ય પરમાત્મનઃ સર્વાત્મકત્વદ્યોતનાર્થં સર્વાત્મકત્વપ્રતિપાદક-ગાયત્રીમહામન્ત્રસ્યોપાસનપ્રકારઃ પ્રકાશ્યતે । તત્ર ગાયત્રીં પ્રણવાદિસપ્તવ્યાહૃત્યુપેતાં શિરઃસમેતાં સર્વવેદસારમિતિ વદન્તિ, એવંવિશિષ્ટા ગાયત્રી પ્રાણાયામૈરુપાસ્યા । સપ્રણવ-વ્યાહૃતિત્રયોપેતા પ્રણવાન્તા ગાયત્રી જપાદિભિરુપાસ્યા ।

તત્ર શુદ્ધગાયત્રી પ્રત્યગ્બ્રહ્મૈક્યબોધિકા । ધિયો યો નઃ પ્રચોદયાદિતિ—નઃ અસ્માકં ધિયઃ બુદ્ધિઃ યઃ પ્રચોદયાત્ પ્રેરયેત્ ઇતિ સર્વબુદ્ધિ-સંજ્ઞાન્તઃકરણપ્રકાશકઃ સર્વસાક્ષી પ્રત્યગાત્મા ઉચ્યતે । તસ્ય પ્રચોદયાચ્છબ્દનિર્દિષ્ટસ્યાત્મનઃ સ્વરૂપભૂતં પરં બ્રહ્મ—તત્સવિતુરિત્યાદિપદૈર્નિર્દિશ્યતે ।

તત્ર ' ૐ તત્સદિતિ નિર્દેશો બ્રહ્મણસ્ત્રિવિધઃસ્મૃતઃ ' ઇતિ તચ્છબ્દેન પ્રત્યગ્ભૂતં સ્વતઃસિદ્ધં પરં બ્રહ્મોચ્યતે । સવિતુરિતિ સૃષ્ટિસ્થિતિલય- લક્ષણકસ્ય સર્વપ્રપઞ્ચસ્ય સમસ્તદ્વૈતવિભ્રમસ્યાધિષ્ઠાનં લક્ષ્યતે । વરેણ્યમિતિ સર્વવરણીયં નિરતિશયાનન્દરૂપમ્ । ભર્ગ ઇત્યવિદ્યાદિ-દોષભર્જનાત્મકજ્ઞાનૈકવિષયમ્ । દેવસ્યેતિ સર્વદ્યોતનાત્મકાખણ્ડ-ચિદેકરસમ્ । સવિતુર્દેવસ્યેત્યત્ર ષષ્ઠ્યર્થો રાહોઃ શિર ઇતિવદૌપચારિકઃ બુદ્ધ્યાદિસર્વદૃશ્યસાક્ષિલક્ષણં યન્મે સ્વરૂપં તત્સર્વાધિષ્ઠાનભૂતં પરમાનન્દં નિરસ્તસમસ્તાનર્થરૂપં સ્વપ્રકાશચિદાત્મકં બ્રહ્મેત્યેવં ધીમહિ ધ્યાયેમ ।

એવં સતિ સહ બ્રહ્મણા સ્વવિવર્તજડપ્રપઞ્ચસ્ય રજ્જુસર્પન્યાયેન અપવાદ-સામાનાધિકરણ્યરૂપમેકત્વં, સોઽયમિતિ ન્યાયેન સર્વસાક્ષિપ્રત્યગાત્મનો બ્રહ્મણા સહ તાદાત્મ્યરૂપમેકત્વં ભવતીતિ સર્વાત્મકબ્રહ્મબોધકોઽયં

ગાયત્રીમન્ત્રઃ સમ્પદ્યતે ।

સપ્તવ્યાહૃતિનામયમર્થઃ—ભૂરિતિ સન્માત્રમુચ્યતે ભુવ ઇતિ સર્વં ભાવયતિ પ્રકાશયતીતિ વ્યુત્પત્ત્યા ચિદ્રૂપમુચ્યતે । સુવ્રિયત ઇતિ વ્યુત્પત્ત્યા સુષ્ઠુ સર્વૈર્વ્રિયમાણસુખસ્વરૂપમુચ્યતે । મહ ઇતિ મહીયતે પૂજ્યત ઇતિ વ્યુત્પત્ત્યા સર્વાતિશયત્વમુચ્યતે , જન ઇતિ—જનયતીતિ જનઃ, સકલ-કારણત્વમુચ્યતે । તપ ઇતિ સર્વતેજોરૂપત્વમ્ । સત્યમિતિ સર્વબાધરહિતમ્ । એતદુક્તં ભવતિ—યલ્લોકે સદ્રૂપં તદોંકારવાચ્યં બ્રહ્મૈવ, આત્મનોઽસ્ય સચ્ચિદ્રૂપસ્વભાવાદિતિ । અથ ભૂરાદયઃ સર્વલોકા ઓંકારાવાચ્ય-બ્રહ્માત્મકાઃ, ન તદ્વ્યતિરિક્તં કિંચિદસ્તીતિ વ્યાહૃતયોઽપિ સર્વાત્મક-બ્રહ્મબોધિકાઃ ।

ગાયત્રી-શિરસોઽપ્યયમેવાર્થઃ— આપ ઇત્યાપ્નોતીતિ વ્યુત્પત્ત્યા વ્યાપિત્વમુચ્યતે જ્યોતિરિતિ પ્રકાશરૂપત્વમ્ । રસ ઇતિ સર્વાતિશયત્વમ્ । અમૃતમિતિ મરણાદિ સંસારનિર્મુક્તત્વમ્ । સર્વવ્યાપિસર્વપ્રકાશકસર્વોત્કૃષ્ટનિત્યમુક્તમાત્મરૂપં સચ્ચિદાત્મકં યદોંકારવાચ્ચ્યં બ્રહ્મ તદહમસ્મિ ।

ઇતિ ગાયત્રીમન્ત્રસ્યાર્થઃ ।

ગુહાશયબ્રહ્મહુતાશનોઽહં
    કર્ત્રેદમંશાખ્ય હવિર્હુતં સત્।
વિલીયતે નેદમહં ભવાની-
    ત્યેષ પ્રકારસ્તુ વિભિદ્યતેઽત્ર ॥

યદસ્તિ યદ્ભાતિ તદાત્મરૂપં
    નાન્યત્તતો ભાતિ ન ચાન્યદસ્તિ ।
સ્વભાવસંવિત્પ્રવિભાતિ કેવલા
    ગ્રાહ્યં ગ્રહીતેતિ મૃષૈવ કલ્પના ॥

Encoded and proofread by Sunder Hattangadi

Meaning of Gayatri mantra by Swami Vidyaranya (circa 13 cent. A.D.)

*Gayatri Mantra*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*